CAREERINDIA

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8 ]
Total No. of Printed Pages : 8 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 38 ]
Total No. of Questions : 38 ]

**A**

**CCE RF**
**CCE RR**
**REVISED**

Question Paper Serial No. **21**

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 67-S**

**Code No. : 67-S**

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : Third Language — SANSKRIT

# तृतीय भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ & ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Fresh & Regular Repeater)**

ದಿನಾಂಕ : 03. 04. 2020 ] [ Date : 03. 04. 2020
ಸಮಯ : ಬೆಳಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-30 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-30 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 80 ] [ Max. Marks : 80

***ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 38 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचना:***

1. अस्मिन् प्रश्नपत्रे अष्टत्रिंशत् (38) वस्तुनिष्ठा: विषयनिष्ठाश्च प्रश्ना: सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टा: नियमा: अनुपालनीया: ।
4. प्रश्नानां प्रति अधिकृता: अङ्का: पार्श्वे लिखिता: सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारित: समयावधि: प्रश्नपत्रस्य उपरि भागे लिखित: अस्ति । पञ्चदशनिमेषा: प्रश्नपत्रस्य पठनार्थं निर्धारिता: सन्ति ।

इत: कर्तयत

**TEAR HERE TO OPEN THE QUESTION PAPER**
प्रश्नपत्रमुद्घाटयितुमित: कर्तयत

**Tear here**

www.careerindia.com

CAREERINDIA



I. **अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत ।** $8 \times 1 = 8$

1. "सरोवरः" अस्य समानार्थकं पदम् इदं भवति ।

   (A) करः (B) शरः

   (C) सरः (D) वरः ।

2. "आदरः" अस्य विरुद्धार्थकं पदम् इदं भवति ।

   (A) समादरः (B) अनादरः

   (C) सोदरः (D) सादरः ।

3. "अर्जुनस्य" इत्यत्र एषा विभक्तिः भवति ।

   (A) सप्तमी विभक्तिः (B) चतुर्थी विभक्तिः

   (C) पञ्चमी विभक्तिः (D) षष्ठी विभक्तिः ।

4. "वसति" अत्र एषः लकारः भवति ।

   (A) लङ् लकारः (B) लोट् लकारः

   (C) लट् लकारः (D) लृट् लकारः ।

5. "करोमि" अत्र एषः पुरुषः भवति ।

   (A) उत्तमपुरुषः (B) प्रथमपुरुषः

   (C) मध्यमपुरुषः (D) अन्यपुरुषः ।

6. देवी विराजमाना अस्ति । अत्र रेखाङ्कितपदे एषः प्रत्ययः भवति ।

   (A) क्त प्रत्ययः (B) शानच् प्रत्ययः

   (C) तुमुन् प्रत्ययः (D) ल्यप् प्रत्ययः ।



www.careerindia.com

CAREERINDIA



7. "बालकः पत्रं हस्तेन लिखति" । अत्र रेखाङ्कित पदस्य कारकम् इदं भवति ।

(A) अपादानकारकम्   (B) कर्मकारकम्

(C) अधिकरणकारकम्   (D) करणकारकम् ।

8. अत्र समूहेतरं पदम् इदं भवति ।

(A) ततः   (B) भवदीयः

(C) मध्यमः   (D) गुणवान् ।

II. **चतुर्थं पदं लिखत ।** 4 × 1 = 4

9. स्वामी विवेकानन्दः – गुरुः :: अखण्डानन्दः – ........................ ।

10. मधुसूदनः – श्रीकृष्णः :: पवनपुत्रः – ............................ ।

11. कुण्डलीकृतनागेन्द्रः – गणेशः :: प्रणमतां चिन्तामणिः – ........................ ।

12. पुण्यपीयूषपूर्णाः – सन्तः :: पाण्डित्यम् – ............................ ।

III. **एकवाक्येन उत्तरं लिखत ।** 4 × 1 = 4

13. प्रभा केन सह विश्वसंस्कृतपुस्तकमेलां गतवती ?

14. अर्जुनः अन्ते किं ज्ञातवान् ?

15. लङ्कातः हनूमान् कम् आदाय प्रतस्थे ?

16. भारतीयान् अस्मान् का बध्नाति ?

IV. **द्वित्रैः वाक्यैः उत्तरं लिखत ।** 4 × 2 = 8

17. कुरुक्षेत्रे कर्णार्जुनयोः युद्धं कथम् आसीत् ?

18. विश्वसंस्कृतपुस्तक मेला कुत्र सम्पन्ना ? तत्र बहुजनाकृष्टं स्थानं किम् ?



www.careerindia.com

CAREERINDIA



19. सुभाषितकारस्य अभिप्रायेण कालान्तरे कानि विनश्यन्ति ?

20. सूर्यवंशस्य राजा दिलीपः कीदृशीम् उर्वीम् एकपुरीमिव शशास ?

**अथवा**

कालिदासस्य अभिप्रायेण रघुवंशीयराजाः कथम् आसन् ?

V. **संस्कृतभाषया अनुवादं कुरुत ।** $1 \times 2 = 2$

21. ಸಾಮಾನ್ಯವಾಗಿ ಪಕ್ಷಿಗಳು ಗೂಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತವೆ. ಅವು ಆಕಾಶದಲ್ಲಿ ಹಾರುತ್ತದೆ.

VI. **कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** $1 \times 2 = 2$

22. गोदावरीनदीतीरे विशालः शाल्मलीतरुः अस्ति । तत्र अनेके पक्षिणः निवसन्ति ।

VII. 23. **विग्रहवाक्यं लिखत ।** $2 \times 1 = 2$

a) शूलपाणिः ।

b) राघवेन्द्रः ।

**अथवा**

समस्तपदं लिखत ।

a) विधिम् अनतिक्रम्य = ................

b) क्षीराणां निधिः = ................

VIII. **लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** $1 \times 2 = 2$

24. "गगनं गगनाकारम्" ।

IX. **यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** $2 \times 3 = 6$

25. "गच्छ अद्य अहं पुस्तकं न दास्यामि ।"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. "जित्वा पृथिवीं ददामि ।"

कः पाठः ? कः अवदत् ? कम् अवदत् ?



www.careerindia.com

CAREERINDIA



X. 27. **सन्धिं विभज्य नाम लिखत ।** 3 × 1 = 3

a) ज्योतिर्गमय

b) महेन्द्रः

c) तदन्वये ।

XI. **प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दो नाम लिखत ।** 1 × 3 = 3

28. "चूडामणिं कपिवरस्य ददौ दशास्य" ।

XII. **कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** 1 × 3 = 3

29. वेदव्यासः

**अथवा**

भोजराजः ।

XIII. **पद्यपाठस्य नाम विलिख्य, तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** 3 × 3 = 9

30. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ।।

31. हिमालयो नः पूज्यः शैलः
पूज्यनदी सा गङ्गाम्बा ।
साहित्यं नः सङ्गीतमपि
भाषा भेदेऽप्येकमिह ।।

32. शैशवेऽभ्यस्त विद्यानाम्
यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनाम्
योगेनान्ते तनुत्यजाम् ।।

www.careerindia.com

CAREERINDIA



XIV. **पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** $1 \times 3 = 3$

33. गुरवे ........................................................................ ।

........................................................................ नमः ॥

XV. **दशवाक्यैः उत्तरं कर्नाटकभाषया आङ्ग्लभाषया, संस्कृतभाषया वा लिखत ।** $2 \times 4 = 8$

34. कर्नाटक राज्यस्य मेलुकोटे क्षेत्रे श्रीरामनुजाचार्यस्य योगदानं विवृणुत ।

35. धर्मध्वजस्य भार्यासु कतमा सुकुमारतमा इति -

"विक्रमः वेतालश्च" पाठे कथं निरूपितम् ? लिखत ।

**अथवा**

"उभयभारती" इति कथाभागं सङ्गृह्य लिखत ।

XVI. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** $4 \times 1 = 4$

36. भारते अनेके कवयः आसन् । तेषु प्रधानभूतौ वाल्मीकिः व्यासश्च । तयोः वाल्मीकिः 'आदिकविः' इति प्रसिद्धः । पुरा प्रचेता नाम मुनिरासीत् । तस्य ऋक्षो नाम कश्चन पुत्रः अजायत। बाल्यात् एव अयं चोराणां संसर्गे पतितः । अतः चौर्यवृत्तिम् एव अङ्गीकृतवान् । एकदा सप्तर्षयः वनमार्गेण गच्छन्ति स्म । तान् विलोक्य चोरः ऋक्षः तेषां वस्तूनि अपहर्तुम् अभ्यपतत् । तदा ते एवम् अवदन् । भवान् पापकार्यं कुर्वन् अस्ति । तव पापफलम् अनुभोक्तुं कुटुम्बिनः अङ्गीकुर्वन्ति वा ? न वा इति पृच्छतु । तदा सः गृहं गत्वा अपृच्छत् । कुटुम्बिनः प्रत्यवदन्-वयं पापभागिनः न भवेम इति । ऋक्षः प्रत्यागत्य सप्तर्षीन् शरणम् अगच्छत् । ते ऋषयः तस्मै राममन्त्रम् उपादिशन् । सः वृक्षमूले उपविश्य राममन्त्रम् अजपत् । तं परितः वल्मीकं समवर्धत । कालान्तरे सः वल्मीकात् बहिः आगतवान् । तदनन्तरं सः "वाल्मीकिः" इति प्रसिद्धः अभवत् । ब्रह्मणः आदेशेन सः "श्रीमद्रामायणम्" अरचयत् । तत्तु 'आदिकाव्यम्' इति जगति विख्यातम् ।

i) आदिकविः इति कः प्रसिद्धः ?

ii) एकदा सप्तर्षयः केन मार्गेण गच्छन्ति स्म ?

iii) वाल्मीकिः कुत्र उपविश्य राममन्त्रम् अजपत् ?

iv) ब्रह्मणः आदेशेन वाल्मीकिः किम् अरचयत् ?

www.careerindia.com

CAREERINDIA



XVII. **दशवाक्यैः प्रबन्धं लिखत ।** $1 \times 4 = 4$

37. ''सङ्गणकयन्त्रम्''

**अथवा**

''परिसरमालिन्यम्'' ।

XVIII. **पत्रं लिखत ।** $1 \times 5 = 5$

38. मङ्गलूरु मण्डलस्य सर्वकारीय विद्यालयस्य छात्रः/छात्रा इति मत्वा अग्रजस्य विवाहार्थं दिनचतुष्टयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

शैक्षणिकप्रवासार्थं धनं प्रेषयितुं सम्प्रार्थ्य पितरं प्रति पत्र लिखत ।

www.careerindia.com

www.careerindia.com